# suvachanAni

# સુવચનાનિ

## Document Information

Text title : suvachanaani

File name : suvachanaani.itx

Category : subhAShita, subhaashita

Location : doc_z_misc_subhaashita

Transliterated by : NA

Latest update : December 23, 1998

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 31, 2020

*sanskritdocuments.org*

# સુવચનાનિ

અતિપરિચયાદવજ્ઞા ।

અતિલોભો વિનાશાય ।

અતિતૃષ્ણા ન કર્તવ્યા ।

અતિ સર્વત્ર વર્જયેત્ ।

અધિકસ્યાધિકં ફલમ્ ।

અનતિક્રમણીયા હિ નિયતિઃ ।

અલ્પશ્ચ કાલો બહવશ્ચ વિઘ્નાઃ ।

અલભ્યો લાભઃ ।

અવ્યાપારેષુ વ્યાપારઃ ।

અહિંસા પરમો ધર્મઃ ।

અભદ્રં ભદ્રં વા વિધિલિખિતમુન્મૂલયતિ કઃ ।

અર્થો હિ લોકે પુરુષસ્ય બન્ધુઃ ।

આકૃતિર્બકસ્ય દૃષ્ટિસ્તુ કાકસ્ય ।

આયે દુઃખં  વ્યયે દુઃખં ધિગર્થાઃ કષ્ટસંશ્રયાઃ ।

ઇક્ષુઃ મધુરોઽપિ  સમૂલં ન ભક્ષ્યઃ ।

ઇતઃ કૂપઃ તતસ્તટી ।

ઇતો ભ્રષ્ટસ્તતો ભ્રષ્ટઃ ।

ઈશ્વરેચ્છા બલીયસી ।

ઉત્પદ્યન્તે વિલીયન્તે દરિદ્રાણાં મનોરથાઃ ।

ઉત્સવપ્રિયાઃ ખલુ મનુષ્યાઃ ।

કણ્ટકેનૈવ કણ્ટકમુદ્ધરેત્ ।

કર્તવ્યો મહદાશ્રયઃ ।

કવયઃ કિં ન પશ્યન્તિ ?

કાવ્યશાસ્ત્રવિનોદેન કાલો ગચ્છતિ ધીમતામ્ ।

કાલાય તસ્મૈ નમઃ ।

કિમિવ હિ મધુરાણાં મણ્ડનં નાકૃતીનામ્ ।
કિમિવ હિ દુષ્કરમકરુણાનામ્ ।
કિં મિષ્ટમન્નં ખરસૂકરાણામ્ ?
ક્ષમયા કિં ન સિદ્ધ્યતિ ।
ક્લેશઃ ફલેન હિ પુનર્નવતાં વિધત્તે ।
ગતં ન શોચ્યમ્ ।
ગતાનુગતિકો લોકઃ  ન કશ્ચિત્ પારમાર્થિકઃ ।
ગહના કર્મણો ગતિઃ ।
ગુણાઃ સર્વત્ર પૂજ્યન્તે ।
ચક્રવત્પરિવર્તન્તે દુઃખાનિ ચ સુખાનિ ચ ।
જનની જન્મભૂમિશ્ચ સ્વર્ગાદપિ ગરીયસી ।
જલબિન્દુનિપાતેન ક્રમશઃ પૂર્યતે ઘટઃ ।
જીવો જીવસ્ય જીવનમ્ ।
ત્રુટિતઃ સમ્બન્ધઃ પ્રશાન્તઃ કલહઃ ।
ત્રૈલોક્યે દીપકઃ ધર્મઃ ।
દુર્લભં ભારતે જન્મ  માનુષ્યં તત્ર દુર્લભમ્ ।
દૂરતઃ પર્વતાઃ રમ્યાઃ ।
દ્રવ્યેણ સર્વે વશાઃ ।
ધર્મો મિત્રં મૃતસ્ય ।
ધીરાઃ હિ તરન્તિ આપદમ્ ।
નાસ્તિ સત્યસમો ધર્મઃ ।
ન કૂપખનનં યુક્તં પ્રદીપ્તે વહ્નિના ગૃહે ।
ન ભૂતો ન ભવિષ્યતિ ॥

નમઃ શિવાય ।
નમો ભગવતે વાસુદેવાય ।
ન હિ જ્ઞાનેન સદૃશં પવિત્રમિહ વિદ્યતે ।
ન શાન્તેઃ પરમં સુખમ્ ।
નિગૂઢેઽપિ કુક્કુટે  ઉદેત્યેવ અરુણઃ ।
નિર્વાણદીપે કિમુ તૈલદાનમ્ ।
નિરસ્તપાદપે દેશે  એરણ્ડોઽપિ દ્રુમાયતે ।
નિઃસ્પૃહસ્ય તૃણં જગત્ ।

ન નિશ્ચિતાર્થાત્ વિરમન્તિ ધીરાઃ ।

નિર્ધનસ્ય કુતઃ સુખમ્ ।

નીચૈર્ગચ્છત્યુપરિ ચ દશા ચક્રનેમિક્રમેણ ।

પરદુઃખં શીતલમ્ ।

પરોપકારાથમિદં શરીરમ્ ।

પરોપદેશે પાણ્ડિત્યમ્ ।

પરોપકારઃ પુણ્યાય ।

પરોપકારાય સતાં વિભૂતયઃ ।

પુનઃ પુનરપિ પ્રક્ષાલ્ય કજ્જલં ન શ્વેતાયતે ।

પિણ્ડે પિણ્ડે મતિર્ભિન્ના ।

પ્રજ્જ્વાલિતો જ્ઞાનમયઃ પ્રદીપઃ ।

પ્રથમગ્રાસે મક્ષિકાપાતઃ ।

પૃથિવ્યાં ત્રીણિ રત્નાનિ  જલમન્નં સુભાષિતમ્ ।

બધિરાત્ મન્દકર્ણઃ શ્રેયાન્ ।

બહુજનહિતાય બહુજનસુખાય ।

બહુરત્ન વસુન્ધરા ।

બાલાનાં રોદનં બલમ્ ।

બુદ્ધિઃ કર્માનુસારિણી ।

બુદ્ધિર્યસ્ય બલં તસ્ય ।

ભદ્રં કર્ણેભિઃ શ્રુણુયામ દેવાઃ ।

ભવન્તિ ભવિતવ્યાનાં દ્વારાણિ સર્વત્ર ।

ભિન્નરુચિર્હિ લોકઃ ।

મધુ તિષ્ઠતિ જિહ્વાગ્રે  હૃદયે તુ હલાહલમ્ ।

મનઃ પૂતં સમાચરેત્ ।

મનોરથાનામગતિર્ન વિદ્યતે ।

મરણં પ્રકૃતિઃ શરીરિણામ્ ।

મહાજનો યેન ગતઃ સ પન્થાઃ ।

માર્ગારબ્ધાઃ સર્વયત્નાઃ ફલન્તિ ।

માતૃદેવો ભવ ।

પિતૃદેવો ભવ ।

આચાર્યદેવો ભવ ।

અતિથિદેવો ભવ ।

મૂઢઃ પરપ્રત્યયનેયબુદ્ધિઃ ।
મૃદુર્હિ પરિભૂયતે ।
મૌનં સર્વાર્થસાધનમ્ ।
યથા બીજં તથા અઙ્કુરઃ ।
યથા રાજા તથા પ્રજા ।
યદ્ વા તદ્ વા ભવિષ્યતિ ।
યદ્ વા તદ્ વા વદતિ ।
યાચકો યાચકં દૃષ્ટ્વા શ્વાનવત્ ગુર્ગુરાયતે ।
યાદૃશં વપતે બીજં તાદૃશં લભતે ફલમ્ ।
યઃ ક્રિયાવાન્ સ પણ્ડિતઃ ।
યુદ્ધસ્ય કથા રમ્યા ।
યેન કેન પ્રકારેણ પ્રસિદ્ધઃ પુરુષો ભવેત્ ।
યોજકસ્તત્ર દુર્લભઃ ।
રાજા કાલસ્ય કારણમ્ ।
વન્દે માતરમ્ ।
વક્તા દશસહસ્રેષુ ।
વચને કા દરિદ્રતા ?
વિદ્વાન્ સર્વત્ર પૂજ્યતે ।
વિદ્યાધનં સર્વધનપ્રધાનમ્ ।
વિનાશકાલે વિપરિતબુદ્ધિઃ ।
શઠં પ્રતિ શાઠ્યમ્ ।
શરીરમાદ્યં ખલુ ધર્મસાધનમ્ ।
શીલં પરં ભૂષણમ્ ।
શુભાસ્તે પન્થાનઃ ।
શુભં ભવતુ ।
સત્યમેવ જયતે ન અનૃતમ્ ।
સત્યં કણ્ઠસ્ય ભૂષણમ્ ।
સુખમુપદિશ્યતે પરસ્ય ।
સંહતિઃ કાર્યસાધિકા ।
સ્વભાવો દુરતિક્રમઃ ।

*suvachanAni*

pdf was typeset on July 31, 2020

Please send corrections to *sanskrit@cheerful.com*